नं० ४२५१ — ग

शास्त्रदीपिका सप्तमाध्यायः

पत्राणि १८

नं० ४२५१-घ

(पृगसन्नदीपिकासप्तमाध्यायः

नं० ४२५१-घ

पत्राणि १६ (सपरदृश)

शास्त्रदीपिका ८ अध्याय पत्रे १०

श्रीगणेशायनमः॥ ॥अतिप्रमाणस्याक्षेपाणांमुख्यभेदे यथाधिकारभावःस्यात्॥ ॥
उपदेशविचारेसमाप्तेऽधुनातदधीनसिद्धिरतिदेशोविचारःप्रस्तोष्यते।तदुपोद्घा
तत्वेनप्रथममिदंविचार्यते [illegible] येधर्मादर्शपूर्णमासयोर्ज्योतिष्टोमस्य
चप्रकरणेसमाम्नाताःप्रयाजादयोदीक्षणीयादयश्चतेकिंसर्वयागार्थत्वेनोप
दिश्यन्ते।उतयथाप्रकरणंव्यवतिष्ठन्तइति।यदिसर्वार्थाःततःसोर्यश्येनादीना
मपिउपदेशात्पूर्वांगलाभात्नातिदेशविचारआरब्धव्योभवति।व्यवस्थिते
षुतुसोर्यादीनांसाकांक्षत्वात्अतिदेशेनधर्मसङ्ज्ञावतद्विशेषतदूहतद्बा
धादिविचारार्थमुत्तरोध्यायगणआरब्धव्यः।तदर्थमिदंविचार्यते।किंयजिप्र राम
युक्ताःधर्माःपञ्चर्थाःप्रथमंयजिभावनोद्देशेनविहिताःसन्तःपश्चात्तत्कारलिक

याऽपूर्वभावनया तद्द्वारेण संभंत्स्यंते। उक्तापूर्वप्रयुक्ता अपूर्वार्था अपूर्वभावनया प्रथम
मिद्धं भावेनान्विताः पश्चात्करणभूतस्य यजेरनुग्राहका भवंतीति। किंप्रापणं धर्मी
णां करणं गत्वे विवादो नैव विद्यते। भावनान्वपेक्षं च तादर्थ्यं नावकल्प्यते।१। अपूर्वभा य३
वनया हि संबध्यमाने करणेतिकर्तव्यते तुल्यकल्पे स्यातां। न करणं गत्वमितिकर्तव्य
तायाः स्यात्। तस्मात्करणोद्देशेन विधातव्याः। केन पुनः करणमुद्दिश्यते। केचिदाहुः।
प्रकरणा[illegible]म्नानानुमितेन वाक्येनेति। ननु तेन प्रकृतस्यैव दर्शपूर्णमास
देरुद्देशात्कथं सर्वार्थत्वं। उच्यते। प्रकृतस्याप्युद्देशकत्वेन यजतिरेवानुकल्प्यः। स
च स्वसामर्थ्यात्सर्वयोगानुपस्थापयन्सर्वयागार्थतां नयति। न चैतस्मिन्प
क्षे दर्शपूर्णमासवाक्यस्य समिदादिवाक्यानां चैकवाक्यता संभवति। येन सर्वैः

संहत्यसमिदादिविशिष्टदर्शादिविधानात् यागांतरे धर्मा न स्युः। तथा सति करणस्य
फलं प्रत्युपादानात् अंगानि प्रति चोद्देशात् वैरूप्यं स्यात्। तस्मात् फलवाक्ये फलं प्रति
यागं विधाय पर्यवसिते पृथग्वाक्यैः समिदादिभिरनुमितयज्युद्देशकशब्दयु
क्तैरंगानि विधीयंते। न च प्रकरणादुद्देश्यो यजिर्विशेष्टुं शक्यते। आकांक्षारूपस्य प्र
करणस्याविशेषकत्वात्। सन्निधेश्च यजिश्रुतिजनितविशेषप्रत्ययेन बाध्यमा
नत्वात्। तस्मात् सर्वार्थी इति। भाष्यानुसारिणस्त्वाहुः। दर्शपूर्णमासादिवाक्य
मेव यजीनामुद्देशकं न हि तद्यागोत्पत्तिपरं। आग्नेयादिवाक्यैरेवोत्पन्नत्वात्।
न च फलसंयोगार्थं सर्वेभ्यो दर्शपूर्णमासौ सर्वेभ्यो ज्योतिष्टोम इति स्वर्गकामा राम
र्थत्वस्यापि सिद्धत्वात्। तस्मादनन्यार्थत्वादनेन नानाफलवतो यागाननुद्दिश्य ध २

2

वर्त्तितेना सर्वा अवघाताद्यो पियजिनिप

मा विधीयंते। न चोद्देशं दर्शपूर्णमासशब्दः स्वर्गकामशब्दो वा शक्नोति विशेष्टुं। तस्मा
दधिकृतमात्रोपलक्षणं स्वर्गकामशब्दः। दर्शपूर्णमासशब्दस्तु प्रायेण पर्वकालवा
त् यागानामनुवादः। न च सन्निधेराग्नेयादीनामेवोद्देशः। प्रकृतिजनिता विशेषप्रत्य
येन विरोधादित्युक्तं प्राक्। तस्मात् घजिप्रयुक्ता धर्माः सर्वार्थाः। किं चाग्नेयादिभिर्द्र
व्यैः प्रत्यक्षं यजिनिर्वर्त्तनावेव व्रीह्यादीनामेवोपकुर्वंतीति तस्मात्तेनाव घज्यर्थाः। त
सामान्यादितरेषु तथात्वं। यघपि यजिविशेषं प्रति धर्मविधिः। यघपि च भाव
नया संबंधः तथापि पारिप्लवाः। तद्रूपत्वाद्यागांतराणां भावनांतराणां चातघ
र्थालोकेवाहीकोयमतिप्रिर्यवान्नेन परिवेष्टव्य इत्यत्रैकेयघपि वाहीकविशेषं
प्रतिपद्यमानत्वं प्रक्रांतं तथाप्यन्येषामपि वाहीकानां यवान्नप्रियत्वं गम्यते। तद्वद्यजि

रूपस्य व्यक्तिविशेषस्य यजिकरणकस्य च भावनाविशेषस्योक्ता धर्मास्तद्रूपाणा
मन्येषामपि साधारणा इति शक्यमवगंतुं । तस्मात्सर्वार्थाधर्मा इति अनारभ्योऽति
देशविचार इति प्राप्ते ऽभिधीयते ॥ प्रधानविधिवाक्यैः खल्वंगवाक्यं समन्वितं । अंगप्रधा
नसंयुक्तां विधत्ते ऽपूर्वभावनां ।१। भावनान्वयतः पश्चादंशयोरार्थिको ऽन्वयः । ततः कर्मा
तरें गानां प्राप्तिराशंक्यते कुतः ।२। भावनान्वयिता मात्रान्नांशयोस्तु तुल्यकल्पना । अपरि
त्यक्तरूपत्वात्गुणप्राधान्यसंभवात् ।३। यथाफलं भावनयाप्यन्वीयमानं फलत्वाप
रित्यागात् तत्प्राधान्यं प्रतिपद्यते · तथा करणमपि करणात्मना संबद्धं फलं प्रति गुणत्वं
मितिकर्तव्यतां च प्रतिप्राधान्यं । इदमेव हि करणं यत्फलोद्देशप्रवृत्तो कर्तृव्यापारेण व्या राम प्यमानं सत्
फलसाधनतामापद्यते । इतिकर्तव्यता तु येन व्यापारविशेषेण करणस्य फलसाधन

प२ ल्प१ स्त्वंमुपजन्यते स उच्यते।तस्मात्तत्तुल्यकत्वंनचयजिःस्वयमित्थंभावापेक्षः नापिया
गभावनानिर्ज्ञातप्रकारत्वात्।अपूर्वभावनायास्त्वनिर्ज्ञातप्रकारत्वात्तद्भावनाकीदृ
शीतिनज्ञायतेतायागेनापूर्वंकुर्यादित्ययमर्थः।यथाव्यापृतेयागादपूर्वंभवतितथा
व्याप्रियेतेति।कीदृशोसौव्यापारइतिभवतिव्यापारविशेषापेक्षातद्विशेषत्वेनसमि
दादिव्यापारविधानमपेक्षात्संनिधियोग्यत्वैरध्यवसीयते।तस्मात्प्रकृतभावना
शेषत्वात्समिदादीनामपारिप्लवत्वं।व्रीह्यादिद्रव्यमपिफलभावनांशेनसंबध्य
ते।यथाहिक्रियायायागात्स्वर्गोपूर्वंभवतिसाफलभावनायागस्वरूपसंपादनम
पितदंशएवात्रनिष्पन्नस्यफलसाधनभावासंभवात्।अत्रावघातादयोपितत्रै
वव्रीहीणांयोग्यतामादधानाभावनार्थाएवा।नचैवाहीकपृथक्त्वान्नवहुसाधारण्यानु
मानं।लोकेहिप्रमाणांतरवशात्तथावगम्यते।शब्दैकप्रमाणेतुविशेषान्वयेशब्देना

वगम्यमाने पारिप्लव वाक्यसाहस मात्रं तस्माद्यथाप्रकरणं व्यवस्थिता धर्माः । ततश्चानुपदिष्ट
धर्मकेषु सौर्यादिषु अतिदेशेन धर्मसञ्ज्ञावादिक्रिया रचयितव्या । [redacted]
५ [redacted] । तथा चोक्तं प्राकृत
कर्मणो यस्मात् समानेषु कर्मसु धर्मप्रदेशो येन स्यात् सोऽतिदेश इति स्मृत इति । अत्र पद
त्रान्वयः । प्राकृता कर्मणो धर्मप्रदेशो येन स्यात् सोऽतिदेशः । क्व धर्मप्रदेश इत्यपेक्षायामाह ।
यस्मात् समानेष्विति । यस्मात् प्राकृताद् अग्न्यादेर्धर्माः प्रदिश्यन्ते तत्समानेषु सौर्यादिषु
कर्मस्विति । त्रिविधश्चातिदेशः । प्रत्यक्षवचनात् नामधेयात् चोदनालिंगानुमितश्चेति । त वचना
च प्रत्यक्षवचनात् तावद् उच्यते ॥१॥ समाने पूर्ववत्त्वादुत्पन्नाधिकारः स्यात् ॥ ॥ इष्टावेक राम
हे ज्योतिष्टोमविकारे । इषुं त्रिवृतिं करोति सप्तदश सामं भवतीति प्राकृतानां स्तोत्राणां
विकारं विधाय श्रूयते । समानमितरं श्येनेनेति । तत्र संशयः । किमयमनुवादः उत शेष

संनिहितं अस्ति घृतेन तु तन्मात्रेण किंतु पूर्वनिर्दिष्टसदृशं संनिहितं च यद्रूपं तदस्ति घृते। तदिह यत् ३

न वैशेषिकाणामतिदेशविधिरिति। तत्रेतरशब्दस्य संनिहितवचनत्वात् श्येनवैशेषिका
णां चासंनिहितत्वान्न तद्ग्राहकः। चोदकप्राप्तास्तु ज्योतिष्टोमधर्माः ते च श्येनेपि विधीयमानाः
तत्सादृश्यप्रसिद्धेः आपादयंतीति तदपेक्षोयमनुवाद इति प्राप्ते ब्रूमः॥ सत्यमितरशब्दः स
न्निहितं ज्योतिष्टोमिकं न तत्सर्वेक्ति सदृशं अप्राकृतानां सप्तहादीनां पूर्वमुक्तत्वात् अय
त्वं प्राकृतं लोहितोष्णीषादि श्येनवैशेषिकं तद्यद्यप्यसंनिहितं तथापि सादृश्यमस्त्येव
श्येनहानत्वेन्यतरस्मिन्वचनार्थवशाय सन्निधिं हित्वा सादृश्यपरिग्रहेण श्येनवैशेषिकाणां
वादः। यद्वा चोदकप्राप्तानां विष्टुत्यादीनां विकारः इष्टुं विष्टुतिमित्यादिना पूर्वं विहितः त
त इतरश्चोदकप्राप्तमितरच्छब्देनोद्दिश्यतस्य लोहितोष्णीषादिविकारः श्येनादतिदिश्य
ते। एवं संनिहितवचनत्वं अर्थवत्त्वं च वचनस्य भविष्यति॥२॥ पंचसंचरेष्वर्थवादातिदेशः
सन्निधानात्॥ ॥चातुर्मास्येषु चत्वारि पर्वाणि वैश्वदेववरुणप्रघासाः साकमेधाः।

शुनासीरीयं इति। तत्र वैश्वदेविकानामाद्यानां पंचानां हविषां य द्ब्राह्मणं तद्वारुणप्रघा
षु२ सिके पंचस्वतिदिष्टं॰ एतद्ब्राह्मणान्येव पंच हवींषीति। तत्र संशयः। किं यस्तेषामर्थवा
दः वार्त्रघ्नानि वा एतानि हवींषीत्यादिः तन्मात्रस्यायमतिदेशः सैवैषां प्रशंसेति॰
5 उतार्थवादस्यांगविधीनां चनवप्रयाजा इत्यादीनामतिदेश इति। सर्वेषां ब्राह्मणं
यत्तदुत्तरेष्वतिदिश्यते। चोद्यते येन वाक्येन तत्तेषां ब्राह्मणं मतं। १। अंगविधिभिः स्वां
गान्येव विधीयंते न हवींषि। सार्थवादकं तु वाक्यं तेषां विधायकमिति भवत्यर्थवादस्य
तत्संबंधः। तस्मात्तन्मात्रातिदेशः॥ नैवं। यद्यपि ह्यंगविधिभिर्हविषां न विधेयता। तथा
प्यस्य संबंधस्तत्संबंध्यंगचोदनात्॥१॥ किंचाग्नेयवाक्यैकवाक्यतामापन्नं प्र
धानवाक्यं हविषां समग्राणां विधायकमिति विधायकत्वेनाप्यस्यैवांगविधीनां सं
बंधः। तस्मात्सर्वेषामतिदेशः॥३॥ एककपालेष्वग्नीषोमीयतद्वत्त्वं॥ ॥वैश्वदेवेनावत्सर्या राम ५

दशाकपालो वैश्वकर्मण एककपाल इति। ततश्च ब्राह्मणे ऐन्द्राग्न एतद्ब्राह्मण एक २

वापृथिव्य एककपालः। वरुणप्रघासेषु काय एककपालः ऐन्द्राग्नो द्वादशकपालश्च।
ततः साकमेधेषु श्रूयते ऐन्द्राग्न एककपाल इति श्रुतं तत्सर्ववत्सार्थवादकस्य सांग
विधिकस्य कस्मिंश्चित्काण्डे स्यात्तिदेशकर्मित्सु तत्र विवक्षया प्राप्यते॥४॥ एककपालानां वैश्व
देविकः प्रकृतिराग्रयणे सर्वहोमापर्यावृत्तिदर्शनादेवमस्ये च सकृदवदानस्य व
चनात्॥ एतद्ब्राह्मणा एककपाल इति किं वैश्वदेविकस्यैककपालस्य ब्राह्मणमति
दिश्यते। किं वा वारुणप्रघासिकस्येति संशये वारुणप्रघासिके ऽल्पं प्राकृतं वै
श्वदेविके बहु तस्मात्तदतिदेशाय वचनस्य बहुफलत्वायेति प्राप्ते ब्रूमः॥ वारुणप्रघा
सिकस्याव्यवहितत्वात् एतद्ब्राह्मणा ऐन्द्राग्न इत्यनेन निःसंदिग्धवारुणप्रघासिकब्रा
ह्मणानिर्देशेन समभिव्याहारात् वैश्वदेविकस्य तु व्यवहितत्वात्तद्धर्माणां च स्वरसा
म्नैककपालाभिरक्षमिति वक्ष्यमाणादेवन्यायात् भ्रान्तेद्विष्पदैर्वचनानर्थक्यप्र

संगात्त्वारुणप्रधासिवैकैककपालश्रामणस्यातिदेशः॥५॥इतिश्रीशास्त्रदीपिकायां
सप्तमस्यप्रथमःपादः॥सामोभिधानशब्देनप्रवृत्तिःस्यात्तथाशिष्टं॥ कवतीषुरथं
तरं गायतीसूत्रात्नेनरथंतरशब्देन किंकवतीष्वतिदिश्यत इतिपरिज्ञानार्थं रथंतरा
दिशब्दाःकिंगीतिविशिष्टानामभिस्त्वाशूरनोनुम इत्यादीनांवाचकाउतगीतिमात्रस्ये
तिचिंत्यते। द्वितीयेतुमंत्रलक्षणंकुर्वतागीतिःसामेत्येतावदुक्तं न तूपपादितं। इह
त्वतिदेशविषयसिद्ध्यर्थं गीतिविषयत्वमेवन्यायेनदृढीक्रियते। तत्रगीतिविशिष्टेय
मृचिप्रयोगाद्दृग्वचनत्वं॥विशिष्टवचनत्वे विशेषणभूतगीत्यभिधानस्यावश्यकत्वात्त
दभिधानेनचततएवतदविनाभूतायामृचिप्रतिपत्तिसिद्धेरभिधानशक्तिकल्पनानुप
पत्तेर्गीतिमात्रमेषामभिधेयं।अतोभिस्त्वायांयोगीतिविशेषस्तस्यकवत्यादिष्वतिदेशः॥
॥१॥इतिश्रीशास्त्रदीपिकायांसप्तमस्यद्वितीयःपादः॥ ॥उक्तंक्रियाभिधानंतच्छ्रुताव

राम ६

न्यत्रविधिप्रदेशःस्यात्॥ ॥इदानींनामातिदेशः प्रस्तूयते। कुंडपायिनामयनेश्रूयते। मा
समग्निहोत्रंजुहोतीति। तत्रैयमिकाग्निहोत्रात्कर्मान्तरमितिस्थिते संशयः। किमयमग्नि
होत्रशब्दो नैयमिकाग्निहोत्रधर्माणामतिदेशकः उतनेति। उभयोरविशेषेणसामा
नाधिकरण्यतः। नामधेयमिदंतस्मात्तु न धर्माननतिदेक्ष्यति।१। एकस्यत्वभिधेयत्वे
गौणत्वेनापि संभवात्। नानात्वस्याप्यभिधेयत्वमनेकार्थत्वदोषतः।२। नचागत्यमौ
णविशेषत्वं। नैयमिकेग येहोत्रमित्येवंप्रवृत्तिनिमित्तंसंभवति। इतरस्यत्वग्निदेव
त्यत्वंनावगतं। अधर्मकस्य कौंडपायिनः। तद्वचनत्वेसतिगौणत्वंनैयमिकेऽस्य
युज्यते। नैयमिकेस्तुधर्मवान्। ततस्तन्नामेदंतत्सादृश्यविधिस्सयान्यत्रप्रयुज्यते।
सादृश्यंचधर्मनिमित्तं। अतोधर्मातिदेशोयंमासमग्निहोत्रंजुहोतीति।१। अथोपवास

त्रकर्मलिंगुणार्थैर्बाधकातिः स्यात्।।१।। द्वादशाहे प्रथममहः प्रायणीयोतिरात्रः। गवामय
नेपि प्रथमेहनि वैश्वानरो ज्योतिष्टोमः प्रायणीयमहर्भवति। इति प्रायणीयशब्दः प्रयु
ज्यमानः किं द्वादशाहिकधर्माननतिदिशेन्नेति संशये। पूर्ववदतिदेशे प्राप्ते अभिधीयते।। प्रा
यणीयपदं येन निमित्तेन प्रयुज्यते। प्राथम्येन तदत्रैव गावामयनिकेपि नः।१। तस्मा
त्सिद्धनिमित्तेनाक्षानामत्वसंभवात् न गौणत्वेन धर्मविशामतिदेशो व कल्पतो।२।
7 ।।२।। विश्वजितिसर्वपृष्ठे तत्पूर्वकलाज्योतिष्टोमिकानि पृष्ठान्यस्तिच पृष्ठशब्दः।।
विश्वजित्सर्वपृष्ठो भवतीत्यत्र संशयः। किमयं सर्वपृष्ठशब्दोनुवादः उत बृहद्र
थंतरयोर्विकल्पेन प्राप्तयोः समुच्चयविधिः। अथवा षाडहिकानां रथंतरबृह
द्वैरूपवैराजशाक्वररैवतानामिहातिदेश इति। तत्र ज्योतिष्टोमे माहेन्द्रादिषु चतुर्षु शुभं

स्तोत्रेषु सप्तदशानि पृष्ठानीति पृष्ठशब्दप्रयोगात्सर्वेषां पृष्ठत्वं तेषां चेह चोदकात्प्राप्तेः स
र्वपृष्ठत्वं निर्ज्ञातमेव विश्वजितः। तस्मादनुवादः॥ नैवं। बृहद्रथंतरसाधनकमाहेंद्र
स्तोत्रं वचनं एवं पृष्ठशब्दो लिंगसमवायात् चतुर्षु प्रयुक्तः तस्मान्न तेषां पृष्ठशब्दवा
च्यत्वमिति अप्राप्ता सर्वपृष्ठता चोदकेन। अतो नानुवादः। चोदकेन तु विकल्पेन प्रा
प्तयोर्बृहद्रथंतरयोः पृष्ठयोः सर्वत्र समुच्चयो विधीयते॥ नैवमपि युक्तं। सर्वशब्द
स्य बहुपेक्षत्वात् द्वयोरप्रवृत्तेः। तस्मात् षोडशिकानां पृष्ठानां ज्योतिष्टोमविकार ए
व विश्वजिति वचनादतिदेशः। कः पुनर्वचनातिदेशस्यात्र संबंधः। नहि सर्वपृष्ठशब्दः ष
ड्‌हनामधेयं संदिहगुणवत्त्वात् प्रयुक्तं पत्न्तसान्निध्यमित्नोतिदेश इति संगच्छते। सत्यमेव
कर्मसमानाधिकरणपदनिमित्तोयमतिदेश इति नामाधिकारे चिंतितः। परमा
र्थतस्तु वाचनिक एवायमतिदेशः॥ २॥ तथा वभ्रत्यः सोमात्। वरुणप्रघासे

षुश्रूयते। वारुण्ये निष्कासेन तु षेश्राऽवभृथं यंतीति। तत्र किमवभृथशब्देन पांसुसेकं दार्शपौ
र्णमासिकं चोदकप्राप्तमनूद्य तत्र तुषनिष्कासं विधीयते॰ अथ वा सौमिकावभृथधर्म
कं कर्मांतरमिति संशये। अपांसुसेकेप्यवभृथशब्दप्रयोगात् तदनुवादः। ननु तत्र गौ
णो वभृथशब्दः। न चेह गौणग्रहणं न्याय्यं तुल्यमिदं तत्रापि गौणत्वं। अपि चासमानु
8 वादे गौणः न वत्तु विधौ। तस्मादपांसुसेके गुणविधिः। सत्यं ममापि तुल्यत्वमस्ति तत्र तु प्र
माणवत्तु कर्मांतरे प्रयुज्यमानत्वं मेवत्तत्स्वप्रमाणकं। गौणत्वं हि न शब्दस्य स्वरसा
दवगम्यते अर्थांतरे प्रयोगे तु निश्चिते गौणता भवेत्। २। न चेहापांसुसेकपरत्वेऽवभृ
थशब्दस्य प्रमाणमस्ति। यंतीत्यनेन तु प्रकरणांतरन्यायेन कर्मांतरं विधीयते। तत्र राम
प्रयुज्यमानो वभृथशब्दो मुख्यावभृथसादृश्यं विदधत् तद्धर्मानतिदिशतीति न्याय्यं॥४॥
द्रव्यादेशेत द्रव्यश्रुतिसंयोगात् पुरोडाशस्य नादेशेन प्रकृतित्वात्॥ ॥यदिदं कर्मा

तरंतस्मिं पुरोडाशद्रव्यकं उत तुषनिष्कासद्रव्यकमिति विचारः। तत्रावभृथशब्दे न प्रत्य
क्षेण पुरोडाशादिधर्मप्राप्तेः तद्विशिष्टकर्मविधिपरेण च तुषनिष्कासस्य वाक्यभेदा
द्विधा तु भशक्तेः पुरोडाश एव द्रव्यं स्यात्॥ अपूर्वकर्मविधिनाऽनेकेषामपि चोदना
त्॥ अन्यथा तुषनिष्कासपदानर्थक्यदोषतः॥१॥ तद्विशिष्टविधिस्तेन पुरोडाशस्य बाधनं।
क्रियाहि तुषनिष्कासं विशेषेण च चोद्यते॥२॥ अवभृथशब्देन तु गौणेन सर्वावभृथधर्म
साधारणेन च पुरोडाशप्राप्तिः। तस्मात्तस्य बाधः॥५॥ गुणविधिस्तु न गत्यौपासमत्वात्॥
आतिथ्यायां वैष्णवो नवकपालो भवतीति श्रूयते। तत्राप्यवालादयः केचिद्धर्मा विहिताः। रा
जसूये वैष्णवस्त्रिकपाल इति श्रुतो वैष्णवशब्दः किमातिथ्याधर्मानतिदिशेन्नेति संशयेऽस्
मिन् होत्रे न्यायेनातिदेशं मन्वानस्योत्तरं श्रूयतां वैष्णवशब्दोऽयं देवताया विधायकः। न गौण
वृत्त्यातिथ्यस्य धर्मानतिदिशत्यतः॥१॥६॥ निर्मंथ्यादिषु चैवं॥ ॥निर्मंथ्येनेष्टकाः पंच

ति॰ बर्हिषा यूपावटमवस्तृणाति॰ आज्येन यूपमनक्तीति॰ बर्हिराज्यनिर्मथ्यशब्दाः पाशुकस्याग्नि
र्मथ्यस्य दार्शपौर्णमासिकयोश्च बर्हिराज्ययोर्धर्माननतिदिशेयुरिति संशये। वेक्षवशब्दस्या
नतिदेशकत्वेपि इष्टित्वेन दर्शपूर्णमासधर्मलाभात् पशुगमनतिदेशकत्वं। बर्हिरादि
१ शब्दानां वनतिदेशकत्वे ऽन्यतोधर्मालाभात् साकांक्षा विधयः स्युः। तस्मादतिदेशकाइति
विशेषाशंका। लोकतोपि मंथनादिप्रकारलाभात् न श्रुत्यर्थविधिसंभवे गौणत्वं न्याय्य
॥७॥ सौमिके तु प्रणयनमवाच्यं हीतरत्॥ चातुर्मास्येषु चत्वारि पर्वाणि। तत्र श्रूयते॰ द्वयोः
प्रणयंति॰ तस्मात् द्वाभ्यामेतीति। तत्र भाष्यकारः सौमिके तु प्रणयनं इत्यादिभिः सप्त
भिः सूत्रैरधिकरणद्वयं व्याचख्यौ। प्रथमं तावदिदं चिंत्यते। किं सौमिकमिदं प्रणयनं
उत प्राकृतमिति। तत्र प्राकृतस्य चोदकप्राप्तत्वेन वचनानर्थक्यात् प्रणयनमात्रवच राम
नोपि शब्दोर्थवत्त्वाय सौमिकेधर्मवति प्रणयने लक्षणया वर्त्तते। तस्मात् सौमिकमिति ५

प्राप्तेक्रमः।प्राकृतंस्यात्।नहिप्रणयतिशब्दः सौमिकस्यनामधेयंयेनतदुपस्थापयेत्।प्र
णयनेमात्रंतुब्रूते।नञ्चचोदकतएवप्राप्तं।तस्मात्प्रकृतस्यैवायमनुवादः।सकिमर्थः।प
रिसंख्यार्थोवा।द्वयोःप्रणयंतिनत्वनुष्विति।गुणविधानार्थोवा।परिसंख्यायास्त्रिदोषत्वा
त्।अर्थवादार्थोवा।तस्माद्द्वाभ्यामेतीतिगुणश्रवणात्।अर्थवादस्यप्रयोजनमुत्तराधिक
रणेवक्ष्यामः॥८॥प्रथमोत्तमयोःप्रणयनमुत्तरवेदिप्रतिषेधात्॥तत्रैवचिंत्यते।कतरयोर्द्वयो
र्दंप्रणयनं।किमनियमः।उतप्रथमोत्तमयोः उतमध्यमयोरिति।विशेषाभावादनियमः॥
नवैश्वदेवउत्तरवेदिमुपवपंतिनशुनासीरीयइत्युत्तरवेदिप्रतिषेधस्यप्रथमोत्तम
योर्दर्शनात्तयोरेवेदंप्रणयनं।प्रणयनांगंह्युत्तरवेदिः।तद्यदिप्रथमोत्तमयोरिदंप्रण
यनंस्यात्ततस्तयोरुत्तरवेदिःप्राप्नोति।प्राप्तौचसत्यांप्रतिषेधोघटतेनान्यथा।तस्मात्प्र
थमोत्तमयोरितिप्राप्तेभिधीयते॥मध्यमयोःस्यात्।गत्यर्थवादवाक्यशेषात्।तस्मा

ऊरू वारतोयज्ञस्य पद्धरूण प्रघाभ्य साकमेधाश्चे सर्थवादे २

द्वाभ्यामेतीति गतिसाधनभूतयोरिदं प्रणयनमिति गम्यते। गतिसाधनत्वं च मध्यमयोः पर्व
ऽ२ ण्तो रूरौं संस्तवादवगतं। तस्मान्मध्यमयोः। इदं तदर्थवादस्य प्रयोजनं। तद्वशेन हि म
ध्यमयोः प्रणयनं व्यवतिष्ठते। नैव तु व्यवस्थानं। किमर्थं नु प्राप्तस्य प्रणयनस्य मध्यमयोर
नुकीर्तनं। गुणार्थमिति ब्रूमः। अस्मिन्हि प्रणयने उत्तरवेद्यामग्निं निदधातीति श्रुतोपि
दा चेत्तदर्थवादवशात् मध्यमयोः प्रणयने व्यवस्थापितं तदोत्तरवेद्यामग्निं निदधातीति एत
दपि मध्यमयोरेव स्यात्। अन्यथा चतुर्ष्वपि स्यात्। तस्मादुत्तरवेदिं मध्यमयोरुपसंहर्तुं
स्यार्थवादकस्य प्रणयनस्य पुनः श्रवणाय तु न वैश्वदेव उत्तरवेदिमुपवपंति न शुनासी
रीय इति तत्र उपावपंतीति वचनांतरेणाविशेषविहितोत्तरवेदेः प्रथमोत्तमयोः प्र
तिषेधार्थमिति न किंचिदनर्थकं॥ २॥ इदं तु व्याख्यानं वार्त्तिककारेणानुमेने। यत्त राम
व तु क्रमर्थवादार्था पुनः श्रुतिरिति तन्न। नाऽविधीयमानेऽर्थवादः संभवति। विधिन १०

त्वेकवाक्यत्वादिति न्यायाद् विधिशेषस्यानर्थक्यात् नचोत्तरवेद्युपसंहारः प्रयोजनं तदसंभवात्
ससपि हि द्वयोः पर्वणोः सार्थवादप्राकृतप्रणयनानुवादवाक्यान्तरेणाग्निनिधानानुवादे न विनि
युज्यमानोत्तरवेदिः चतुर्ष्वपि चोदकप्राप्ताग्निनिधानसंभवात् सर्वेषु स्यात् । अपि च उपात्तवपनी
त्ययमुत्तरवेद्युपसंहारविधिरनारभ्याधीतो न वैश्वदेवउत्तरवेदिमुपवपंति न शुनासीरीय इ
त्यनेन प्रथमोत्तमाभ्यां पर्युदस्तो मध्यमयोरेव व्यवस्थितः । उभयत्र पेक्षस्य विनियोग इत्युत्तरवेद्या
मग्निं निदधातीत्ययमपि विधिर्मध्यमयोरेव व्यवतिष्ठत इति नार्थो द्वयोः प्रणयंतीत्यस्या यस्तु
प्रणयनं तत्र मिदं प्रकृतितुल्यं विधीयत इत्यर्थवादं समर्प्यते तस्यापि तुल्यमेवानर्थक्यं यदाप
तु न वैश्वदेवउत्तरवेदिमु[illegible]पवपंतीत्ययं प्रतिषेधः पर्युदासो वा न संभवतीति प्रलप्यते न द्वाल सं
मोहनमात्रत्वादुपेक्षणीयां यदि च कल्पं चित द्वयोः प्रणयंतीत्यनेन उत्तरवेद्युपसंहारः सिध्यति
तत्र उपात्तवपंतीत्ययमपि विनियोगापेक्षत्वात् विनियोगव्यवस्थया मध्यमयोरेव व्यवतिष्ठते

न प्रथमोत्तमयोः। तत्र च न वैश्वदेव उत्तरवेदिमिति वचनमनर्थकं स्यात्। अस्त्विति चेन्न। अतो नोत्तरवेदि
कोनारभ्यवाद प्रतिषेध इति सूत्र विरोधात्। इदं हि तत्प्रयोजनं केचनापि सूच्यं। तस्मात् सर्वमिद
मेकमधिकरणमेवं वर्णयितव्यं। द्वयोः प्रणयंतीति किं छाक्तां प्रणयनं उत सौमिकं उतापूर्वमिति
त्रेधा संशयः। तत्र प्रणयनमात्रश्रवणात् तस्य चातिदेशतः प्राप्ते सत्यस्यैवेयं पुनः श्रुतिः परिसंख्या
नार्थो गुणार्थोऽर्थवादार्थो वा। परिसंख्यायसंभवात् आनर्थक्यपरिजिहीर्षया सामान्यवचनोपि
प्रणयनशब्दः सधर्मकं सौमिकं प्रणयनं लक्षणया प्रतिपादयतीति तथा चोत्तरवेदिप्रतिषेधो वक
ल्पते। न वैश्वदेव इति। न चायमनुपात्रवपंतीयस्य प्रतिषेधः। तस्यापि वा तत्प्रकरणेन केवलवरुण
प्रघासविषयत्वात् प्रथमोत्तमयोरप्राप्तेः प्रतिषेधानर्थक्यात्। अस्मिंश्च पक्षे प्रथमोत्तमयोरिदं
सौमिकं प्रणयनं। उत्तरवेदिप्रतिषेधस्य तद्विषयत्वात् यदि च मध्यमयोरेव स्यात् ततस्तद्देशे
व मध्यमयोरुत्तरवेदिसिद्धेः। उपात्रवपंतीयं प्रथमोत्तमविषयमेव स्यात् तयोरेव च प्रतिषेध

राम
१५

रतिव्याघातः स्यात्। तस्मादग्न्यष्टोमोत्तमयोः सौमिकं प्रणयनं पर्युदस्योत्तरवेदिकं विधीयत इति प्राप्ते
विधीयते। नहि प्रणयनीयस्येतत्सौमिकस्याभिधायकं। प्राकृतस्यानुवादे च वचने स्यादनर्थकं। यत
स्मात्प्रणयनीयस्येतदप्राकृतमसौमिकं। अपूर्वं मन्त्रैर्नयनं वदत्याहवनीयतः ॥२॥ यद्यपि प्रणयनमा
त्रं प्रकृतं तथापि शाखान्तरे आहवनीयाद्वा अग्नीन्प्रणयतः इति वेच्छातदेकार्थवादनेन वचनेन प्रा
कृतप्रणयनोत्तरकालमाहवनीयादग्न्यंतरस्य प्रणयनं पशुबंधवद्विधीयते। तत्रोङ्गत्यर्थं वा
दवशान्मध्यमयोः पर्वणो भवति। परिसंख्यार्थमित्यादिसूत्रत्रयं त्रयाणामपि पक्षाणां यथाक्रमेण
प्रयोजनकथनार्थं। उत्तरवेदिप्रतिषेधस्तु पात्नीवतस्य सामान्यविषयस्य पर्युदासार्थः। सा
मान्यविषयत्वं चास्य भाष्य एव समर्थितं ॥८॥ स्वरसामैककपाला मिक्षे च लिंगदर्शनात् ॥९॥ ग
वामयने स्वरसामानः भवंति। किमेते स्वरसामानो गावामयनिके स्वरसामविकारो उत्तनः तथा
वैश्वदेवपर्वणि वैश्वदेव्यामिक्षा द्यावापृथिव्य एककपालः अन्यत्रापि मैत्रावरुण्यामिक्षा वारुण
२४३ कथ्याः सप्तदशाः स्वरसामान इति। अन्यत्रापि अपो। यथा तेषु ह्येते स्वरसामानः ४२

प्रेत्युक्तः षडहः होस्वरसामानां विस्फोरकोऽहः तत्र चयत् तृतीयं संप्तदशमहः तत्र च यस्मिंशस्य स्थानं मभिपयोहरेदिति सउत्तरा
णां स्तोमा नाम व्यवायाय त्रयाणां सप्तदशानामनर्चीननापाइति· आग्रयणे द्यावापृथिवीयं एककपालं विधायाह यत्
सर्वं कुलं करोति सा लोकापरि चक्षाः कृताकृतः पर्यावर्तते जाहिलीया· आज्यस्यैव द्यावापृथिव्यौ यजेते साज्यं विधिपरं वा वेद्ये सर्वे
एककपालइत्यादेरेककपालामिक्षा वैश्वदेविकैककपालामिक्षाविकारो इतनेति संशयोऽस्व
रसामादिशब्दानां गुणविधिवादेक्षवेश ब्ववदनतिदेशकत्वान्नेतद्विकारत्वमिति प्राप्ते ब्रूमः अन्नन
न्यगतिर्मोलिंगेभ्यः स्वरसामत्वे चोदनाशब्दोपबृंहितैत्यस्तद्विकारत्वं। लिंगानि च भाष्ये प्रदर्शि
तानि॥ १॥ कर्मजे कर्म यूपवत्॥ ॥ कर्मनामधेयानामग्निहोत्रादिशब्दानामुक्तमतिदेशकत्वं यौगि
कानां प्रायणीयादिशब्दानां गुणविधीनां च वैश्वदेवादिशब्दानां लिंगविशेषशून्यानां नास्यति
देशनिमित्तत्वमित्युक्तं। कर्मनामवदेवसंस्कारनाम्नां यूपादीनां सिद्धमेवातिदेशनिमित्तत्वं।
इदानीं वासः प्रभृतीनां संस्कारनिमित्तत्वमेवास्ति नास्तीति चिंत्यते। वासो ददाति सुनो ददाती
ति किं वानं तक्षणेन चक्रवासो न निष्पाद्येव दातव्यमुत यथासिद्धमेव दातव्यमिति संशयः।
तत्र·वानं तक्षणक्रियायां सत्यां शब्दप्रयोगात् क्रियानिमित्तो वासःशब्दोऽनःशब्दश्च क्रियामेवद
नां गतया विधत्तः। तस्मात्ताऽनुष्ठेया दाम्नं कुर्वणा एवं प्राप्ते ब्रूमः। जातिशब्दावेतौ· जातस्त्वे

12

राम १२

यव्यतिरेकानुविधानात्। जातिस्तु क्रियाभिव्यंग्येति तदुत्तरकाले शब्दप्रयोगः। ननु शब्दः क्रियावा
चीति तस्मान्नाग्निं पातिदेशके वं शब्दे यः॥१०॥ विशये लौकिकं स्यात् सर्वार्थत्वात्॥ न वैदिकमर्थनिर्देशात्॥
अग्निमुपनिधाय स्तौवीनेति किमाधानसंस्कृतोग्निराहवनीयादिरुपनिधेयः। उत लौकिक इति
संशये संस्कृतस्य प्रयोजनापेक्षत्वात् सामान्यवचनोप्यग्निशब्दस्तद्विषयत्वेन गम्यमानः संस्का
रमुपधानांगत्वेनातिदिशतीति प्राप्ते ब्रूमः। वह्निमात्राभिधायित्वात् न संस्कारातिदेशकं। होमा
दीनि फलापेक्षा संस्कृतानां निवर्तिता। यदाहवनीये जुहोति गार्हपत्ये हविः श्रपय
जातिमात्रवचनत्वात्तु जाती यं यत्किंचिदाक्षिपन्लोकसिद्धमेवोपादाय कृतार्थो न संस्का
रमपेक्षते। तस्माल्लौकिक उपनिधेयः॥११॥ संस्कृतं स्यात्तच्छब्दत्वात्॥ उपशयो यूपो भवती
त्यत्र संशयः। किमुपशये यूपसंस्काराः परिव्याणादयः कार्या नेति। तत्र यूपशब्दः उपशये प्रय

उपशेतर स्थपशयः यूपसमीपस्थ
दारु।२

८× अग्निसमीपे तिष्ठन् पृष्ठस्य देशेः कर्मभिः कुर्यादिति यदि अभिधानं विधीयते ततः उपतिष्ठतिः ×८

13 ज्यमानस्तानतिदिशेत्॥ स स्वयं यदि यूपत्वं विधीयेत विधायकाभावात् वर्त्तमानापदेशो यं यूपो भवती
तितस्माद् अनुवादो यमुपशयस्यायमर्थः। यूपधर्माः केचिच्छेदनादयः उपशये वचनाद् अनुष्ठीयन्ते
तेन निमित्तेन गौणो यं वादः॥१५॥ कर्मणः पृष्ठशब्दस्यान्तथाभूतोपदेशात्॥ ॥अथ यो श्रूयते
पृष्ठेरुपतिष्ठत इति किं पृष्ठशब्दो ज्योतिष्टोमिकपृष्ठधर्मा इति देशकः पृष्ठधर्मकाणि कर्माणि
कुर्यादिति तानि पृष्ठसादृश्याद् एवस्तुत्यात्मकानि भवन्तिः उत पृष्ठसाधनेषु रथन्तरादिषु पृ
ष्ठशब्दः स्तोत्रेरभिधानं चोद्यत इति॥ तत्र उपतिष्ठतिना तावद् एवं कर्म चोद्यते। पृष्ठशब्दो
पि तस्यैव विधत्ते पृष्ठतुल्यतां। उपतिष्ठति धातुः समीपस्थितिवचनः। प्रत्ययो भावनावाची। तद्
यमर्थः। समीपस्थितिवचनः स न अभिधानं लक्षयेत्। पृष्ठशब्दोपि तत्साधनमिष्टुभयोर्लक्ष
णा स्यात्। अस्मत्पक्षे पुनः पृष्ठशब्दे एव धर्मलक्षणेति उपायान यं पक्षः॥ उच्यते। जब भ राम
वति ता पृष्ठशब्दस्येहोभयोः समा। उपतिष्ठति धातुः अप्रसमीपास्थितिवाचकः॥१॥ नवेयं १३

धातुनाभिधानं लक्षणया मंत्रः । किंतु समीपस्थितिरेव धातुनाभिधीयते । सातु समीप
स्थितिरभिधानाद्धेतिब्रूमहे । किं च मंत्रकरणोर्धवर्तमानादुपपूर्वात्तिष्ठतेरात्मनेप
दं भवति । समीपस्थितिश्चात्मनेनाभिधीयते । तेन यथा समीपस्थितो मंत्रः करणं तथा
यतितव्यं । न चाभिधानादन्यत्र साक्षान्मंत्रः करणं तद्यदीयं समीपस्थितिरभिधा
नार्थस्यात्ततो स्याः करणं मंत्रः संपद्यते प्रधानाधीनं हि [redacted]
तदंगानुष्ठानं भवति । अतोभिधानार्थत्वे समीपस्थानस्याभिधानं कुर्वन्मंत्रः समी
पस्थितेः करणमिति शक्यं वक्तुं । अतोभिधानायसमीपस्थितिं वदन्नुपतिष्ठतिः मंत्र
करणार्थो भवत्यात्मनेपदं लभ्यते तेनात्मनेपददर्शनादुपस्थानप्रयोजनमभिधा

15

नमनुमीयते। तदयमर्थः। पृष्ठसाधनैः रथंतरादिभिः समीपेस्थिताग्निमभिदध्यादिति
तस्मादभिधानचोदनेति सिद्धं॥१३॥ इति शास्त्रदीपिकायां सप्तमस्य तृतीयः पादः॥ इ
कर्त्तव्यताविधेर्यजतेः पूर्ववत्वं॥ गतो नामातिदेशः। इदानीमानुमानिकेन वचनेना
तिदेश उच्यते। सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इत्याद्युदाहरणं। तत्र प्रथमं तावदि
दं चिंत्यते किमत्र कुतश्चिद्धर्माः अतिदिश्यंते नेति। प्रमाणाभावान्नातिदेशः। उच्यते।
यागेन भावयेत् ब्रह्मवर्चसमिति भावनामिति कर्त्तव्यतापेक्षामुपदिश्य अग्न्याद्युपदेशे
न तस्या इतिकर्त्तव्यताया असमर्पणात् नूनं अन्यतः सिद्धेति कर्त्तव्यता अत्र शास्त्रेणांगी
कृतेति निश्चीयते। अस्ति चान्यत्र लौकिके पार्वणस्थालीपाकादौ वैदिके च दर्शपूर्ण राम १८
मासादौ। तयोरन्यतरादिह प्रदिश्यत इति स्थिते॥ इह चिंत्यते लौकिकी वैदिकी वेति।

ऐन्द्राग्नादि स्यास्य जर्हुं बर्हिर्जोलुनाति जर्हुं वेधां करोति जुर्हुं नेति। तथापि तत्र यज्ञे नहोतारं वृणीते नार्षेयमिति तथा सोऽर्थः प्रयाजे
प्रयाजहु रूपलं जुहोतीति। तत्राघस्य प्रकरणादुत्कर्षः यत्र बर्हिस्तत्र। न होतारं वृणीत इति निस्यानुवादः। प्रयाजदर्शने

वैदिकी हि निबद्धत्वात्तेतुं नान्यत्र शक्यते। लौकिकी त्वनिबद्धत्वात्सर्वत्रैवानुषज्यते।१। वैदि
कीतिकर्तव्यता प्रत्यक्षेण शास्त्रेण दर्शपूर्णमासादिषु निबद्धा नान्येन संबंद्धुं शक्यते। नहि श्रु
तमितिकर्तव्यताब्राह्मणं दर्शपूर्णमासयोरितिकर्तव्यतां विधाय पुनः सौर्यादावपि विद
धातीति संभवति। न च साधारणेन विधानं प्रकरणेन व्यवस्थितत्वाद्विधानस्य। न
च शास्त्रमंतरेणेतिकर्तव्यतान्वयः संभवति। तस्मान्न वैदिकी। लौकिकी तु पार्वणाष्ट
कादिषु बहुष्वनुवृत्ता साधारणं शास्त्रमनुमापयति। तेन सैव सौर्यादिषु स्यान्न प्रयाज
दिदर्शनं तु पत्र नित्यानुवादवचनानीत्येवं परिहृतं। तस्माल्लौकिकीति प्राप्त उच्यते।
वैदिकी वैदिकत्वेन सामान्येनोपतिष्ठते। लौकिकी त्वसमानत्वान्नोपस्थास्यत्यपेक्षिता।१।
वैदिकस्य तु कर्मणः कथंभावापेक्षायां वैदिक एवेतिकथंभावः शीघ्रमुपतिष्ठते। तदतिक्रमेणा
नुपस्थितलौकिकग्रहणमयुक्तं। यच्चाप्यनुमितात् दृष्टात् लौकिकोऽपि तु वैदिकः। प्रत्य

15 स्ववेदविरहान्नैवासोऽस्य दृशो मतः॥१॥ ननु सोऽपि वेदः केषांचित्प्रत्यक्ष एव। नित्यानुमेयमूल
निराकरणात्॥ सत्यं। तथाप्यस्य दृश एवाकथं। वैतानिककर्माधिकारे हि त्रयीप्रवर्त्तते।
तन्मध्ये तु प्रसंगाद्वैतानिकं किंचिदुच्यते। तेन दर्शपूर्णमासादीनां सौर्यादीनां च तदधि
कारे त्रय्याप्रवृत्तिर्नामावांतरसादृश्यमस्तीति वैदिकस्योपस्थानं। किंच। सौर्यादीनि वै
तानिके नो प्रवर्तंते। लौकिकी हि इतिकर्तव्यता: चारादौपासने कर्त्तव्या। तत्र प्रधानवैदेश्य
मंगानामापद्यते। तस्मादपि वैदिकी न च निबद्धत्वादसौ नान्यत्र नेतुं शक्येति मंतव्यं। समा
नविधानत्वेऽप्ययं दोषः स्यात्। अतिदेशेन त्वन्यत्र गतो निबद्धत्वे गुण एव। न च कश्चिदनि
बद्धोऽन्यत्रातिदेष्टुं शक्यते। न चानुमानेन लौकिकी शक्या कल्पयितुं। गणयागादिषु तदभ
वेनानैकांतिकत्वात्। तस्माद्वैदिक इष्टिभावः सौर्यादिष्वतिदिश्यते। स चावघातप्रयाजा दाम
दिपदार्थजन्यदृष्टादृष्टलक्षणोपकारवर्गरूषितस्तेषामुपकाराणां पदार्थानां च प्राप १५

कोभवति। तद्विधायि च शास्त्रमर्थात्सौर्यादिवाक्यस्य शेषभावमुपगतं भवतीत्यनेनातिप्राये
ण। विध्यंतो वा प्रकृतिवच्चोदनायामित्युक्तो। अस्तु वा विध्यंतस्यैवातिदेशः तथापि प्रकृतिसंब
धितया निरूपितरूपस्यातिदेशः न तु यथापाठमेव शास्त्रं प्रकृतिवद्विकृतेरपि संभवतीयत
ऊहबाधौ न स्यातामिति चोद्यते। यत्रापि ब्राह्मणमेव साक्षादतिदिष्टं तत्र ब्राह्मणान्येव पंचह
वीषीति तत्राप्यन्यसंबंधिनः सतस्तो नैव रूपेणातिदेशादूहादिसिद्धिः। यदि ह्यग्नये जुष्टं नि
र्वपामीत्यनेन रूपेणासौ अर्थप्राप्येत ततोग्निपदस्य देवतापदस्य चासंप्रतिपन्नरूपत्वाद्देव
तापदविवक्षायैवत्तत्पठितं। अग्निपदरूपत्वं विवक्षितमिति न शाक्यमास्थातुं। अग्निपदस्व
रूपमेव विवक्षितमित्यापद्येत। ततो न सूर्यपदं प्रक्षिप्येत नाग्निपदं बाध्येत। ततो नोहः सिद्ध्ये
न्न बाधः। यदि तु प्रकृतौ निरूपितरूपस्य शास्त्रस्य विकृतिसंबंधः तदा प्रकृतावग्निपदस्य

देवतारूपसंशतिप्रत्ने देवतापदरूपमात्रं विवक्षितं दृष्टार्थत्वात् । नाग्निपदरूपं अदृष्टार्थत्वा
त् । देवतापदाधिजिगांसया त्वनुनान्तरीयकत्वादग्निपदमधीतमिति निश्चीयते । नत्वसौर्ये त्ता
16 दृग्रूपमत्रातिदेशादग्निपदस्य चानद्रूपत्वात्स्वरूपस्य चाविवक्षितत्वात् निवर्तनोऽसत्यां देवता
वाचिनः सूर्यपदस्य प्रक्षेपादूहे बाधौ सिद्धौ भवतः । तस्माद्दैविकातिदेशः ।१। द्वादशाहिकम
हर्गणे तद्विकृतित्वाद्दैकाहिकमधिकामानदास्त्वं स्यादेकाहवत् ।। इदानीमानुमानि
कवचननामधेययोर्बलाबलं चिन्त्यते । गवामयने ज्योतिर्गौरायुरित्यादिसंज्ञायुक्ता
यागा उत्पन्नाः । ते षडहगणान्तःपातित्वात्तेषु द्वादशाहस्येति द्वादशाहविध्यन्तःप्राप्ताः । ना
मधेयात्तु ज्योतिराद्यैकाहविध्यन्तः । तत्राविरुद्धाः द्वये पि क्लिप्यन्ते । विरुद्धेषु किं द्वादशाहिकाः राम
अ१ कर्तव्याः चोदको बलवान् उत नाम बलीय स्यादैकाहिका इति संशये । विशेषाभावा ६८
दनियमः ।। एवं चोदको बलवान् । फलसंबंधोत्तरकालाचेतिकर्तव्यताकांक्षा । प्रयो

चोदकबलात् इत्यपिपाठः २

गवाक्ये च फलसंबंधो नाम्नापि च न तत्र श्रूयंते। यान्यपेक्षितं विध्यंतमतिदिशेयुः। तत्स
मान्यात्तु द्वादशाहिकधर्मातिदेश एव तत्रावगम्यते। यास्तु तूसतिचोदनास्तु नामानि श्रुतानि
तत्रालब्ध फलवादसंख्यासिद्धि मात्रापेक्षायां नातिदेशः फलसंबंधं तु प्रतीक्ष्य पश्चादतिदि
शदपि नाम ध्येयं पूर्वविगातगण धर्मा विरोधेन वर्त्तते। तस्माच्चोदको बलवानिति प्राप्तेभि
धीयते प्रसक्ते श्रूयते नाम चोदकस्यानुमानिकः। न प्रसक्तविरुद्धार्थमनुमानं प्रवर्त्तते।
यद्यपि फलसंबंधो धीनेतिकर्तव्यताकांक्षा प्रयोगवाक्ये प्रस्तूयते। तथापि प्रयोगवाक्यमु
त्पत्तिचोदनावगतरूपाणि कर्माण्यालोच्य फलेविनियुंक्ते। तेनोत्पत्त्यालोच्यमानानि स्वरू
विशिष्टान्येवालोच्यंत इति तन्निमित्तोतिदेशः प्रत्यक्षनिमित्तत्वाच्छीघ्रं गम्यते। किंचोत्पत्तिवा
क्येष्वपि भावनास्वभावाज्ञायत एवापेक्षा। तस्मान्नाम बलीयः॥ वचनादभिधानेतस्याथा
विदितव्य स्वरूपमिहातिदेशनं। अनुमावचसापि सत्तयाभवितातस्य विशेषचिंतनं॥ १॥

17

इतिश्रीपार्थसारथिमिश्रविरचितायांशास्त्रदीपिकायांसप्तमस्याध्यायस्यचतुर्थःपा
दः॥समाप्तश्चायमध्यायः॥



राम
९